## क्रुधद्रुहोरुपसृष्टयोः कर्म । (३८/५७६)

पूर्वेण सम्प्रदानसञ्ज्ञायां प्राप्तायां [1]कर्मसञ्ज्ञा विधीयते । क्रुधद्रुहोरुपसृष्टयोरुपसर्गसम्बद्धयोः[2]यं प्रति कोपः, तत् कारकं कर्मसञ्ज्ञं भवति । देवदत्तमभिक्रुध्यति । [3]देवदत्तमभिद्रुह्यति । उपसृष्टयोः इति किम् ? देवदत्ताय क्रुध्यति । [4]यज्ञदत्ताय द्रुह्यति ॥

## राधीक्ष्योर्यस्य विप्रश्नः । (३९/५७७)

राधेरीक्षेश्च [5]कारकं [6]सम्प्रदानसञ्ज्ञं भवति । कीदृशम् ? यस्य विप्रश्नः । विविधः प्रश्नः विप्रश्नः । [7]स कस्य भवति? [8]यस्य शुभाशुभं पृच्छ्यते । देवदत्ताय राध्यति । देवदत्ताय ईक्षते । [9]नैमित्तिकः पृष्टः सन् देवदत्तस्य दैवं [10]पर्यालोचयति इत्यर्थः[11] ॥

## प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता । (४०/५७८)

प्रति आङ इत्येवंपूर्वस्य शृणोतेः [12]कारकं सम्प्रदानसञ्ज्ञं भवति । [13]कीदृशम् ? [14]पूर्वस्य कर्ता । प्रतिपूर्व आङ्पूर्वश्च शृणोति[15]रभ्युपगमे प्रतिज्ञाने वर्तते । स चा[16]भ्युपगमः परेण प्रयुक्तस्य सतो भवति । [17]तत्र प्रयोक्ता [18]पूर्वस्याः क्रियाया कर्ता सम्प्रदानसञ्ज्ञो भवति । देवदत्ताय गां प्रतिशृणोति । [19]देवदत्ताय गामाशृणोति । प्रतिजानीते इत्यर्थः ॥

## अनुप्रतिगृणश्च । (४१/५७९)

पूर्वस्य कर्ता इति वर्तते । अनुपूर्वस्य प्रतिपूर्वस्य च गृणातेः [20]कारकं पूर्वस्याः क्रियायाः कर्तृभूतं संप्रदानसञ्ज्ञं भवति । होत्रेऽनुगृणाति[21] । होता प्रथमं शंसति, तमन्यः [22]प्रोत्साहयति । अनुगरः, [23]प्रतिगरः इति [24]हि शंसितुः प्रोत्साहने वर्तते । होत्रेऽनुगृणाति,[25] होतारं शंसन्तं प्रोत्साहयति इत्यर्थः ॥

## साधकतमं करणम् । (४२/५८०)

क्रियासिद्धौ यत् प्रकृष्टोपकारकं विवक्षितं तत् साधकतमं [26]कारकं करणसञ्ज्ञं भवति । दात्रेण लुनाति । परशुना छिनत्ति । तमब्ग्रहणं किम् ? गङ्गायां घोषः । कूपे गर्गकुलम् (म. भा. १.३३२) । [27]करणप्रदेशाः—'कर्तृकरणयोस्तृतीया' (२.३.१८/५८१) इत्येवमादयः ॥

---

1. अनेन इत्यधिकम् क. 2. प्रयोगे इत्यधिकम् क. 3. यज्ञदत्तमभिद्रुह्यति ह. 4. देवदत्ताय अ. फ, उदारणमिदं नास्ति ह. 5. यत् इत्यधिकम् फ. 6. तत् कारकं इत्यधिकम् फ, स इत्यधिकम् ह. 7. स नास्ति फ. 8. यत्संबन्धि ड.फ. 9. नैमित्तकः ड. 10. पर्यालोचयते इति ड. 11. विप्रश्नः इति किम्? देवदत्ताय राध्यति दैवम् इत्यधिकम् अ. 12. यत् कर्ता तत् फ. 13. कीदृशः ह. 14. पूर्वः ह. 15. अभ्युपगमप्रतिज्ञाने ब, प्रतिज्ञानेऽभ्युपगमे अ. 16. अभ्युपगमपरेण ह. 17. तत्र नास्ति फ. 18. पूर्वस्यां क्रियायाम् ह. 19. यज्ञदत्ताय गां प्रतिशृणोति, यज्ञदत्ताय गामाशृणोति क, उदाहरणमिदं नास्ति फ. 20. कारकं नास्ति फ. 21. होत्रे प्रतिगृणाति इत्यधिकम् ह. 22. प्रतिगृणाति इत्यर्थः फ. 23. प्रतिगरः नास्ति ब. 24. हि नास्ति ड.फ. 25. होत्रे प्रतिगृणाति इत्यधिकम् अ. फ. 26. कारकं नास्ति ड.फ.ह. 27. वाक्यमिदं नास्ति ब.क.ड.फ.ई.ह.